Topic 24 → भ्वादिगणीय क्रमु तथा आकारान्त धातुएँ ।

वा भ्राश-भ्लाश-भ्रमु-क्रमु-क्लमु-त्रसि-त्रुटि-लषः

स्यः श्यन् वा कर्त्रर्थे सार्वधातुके परे । पक्षे - शप्

क्रमः परस्मैपदेषु ।

क्रमो दीर्घः परस्मैपदे शिति । क्रामति । क्राम्यति । चक्राम । क्रमिता । क्रमिष्यति । क्राम्यतु । क्रामतु । अक्राम्यत् । अक्रामत् । क्रामेत् । क्राम्येत् । अक्रमीत् । अक्रमिष्यत् ।

पा पाने ।

पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृश्यर्ति-सर्ति-शद-सदां पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्यर्च्छ-धौ-शीय-सीदाः ।

पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे । पिबादेशो, ऽदन्तस्तेन न गुणः । पिबति ।

आत औ णलः ।

आदन्ताद् धातोर्णल औकारादेशः स्यात् । पपौ ।

आतो लोप इटि च ।

अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः । पपतुः । पपुः । पपिथ, पपाथ । पपथुः

पप। पपौ। पपिव। पपिम। पाता। पास्यति
पिबतु। अपिबत्। पिबेत्।

एर्लिङि।

घुसंज्ञकानां मास्थादीनां च एत्वं स्यात्
आर्धधातुके किति लिङि। पेयात्।
गातिस्था - ०' इति सिचो लुक् - अपात्। अपाताम्

आतः।

सिज्लुकि आदन्तादेव झेर्जुस

उस्यपदान्तात्।

अपदान्तादकाराद् उसि पररूपमेकादेशः
अपुः। अपास्यत्